तुण्डिता-त्री, तुण्डयिता-त्री, तुतुण्डिषिता-त्री, तोतुण्डिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुठिधातुवत् (209) बोध्यानि ।

(738) "तुडृ तोडने" (I-भ्वादिः-351. सक. सेट्. पर.)

'तूडृ—' इति स्वामिशाकटायनादयः । तोडनम्=दारणं हिंसनं च ।
'तोडनार्थे तुडेस्तुण्डेः तुडेत् तोडति तुण्डते ॥' (श्लो. 88) इति देवः ।
[A]तोडकः-डिका, तोडकः-डिका, [1]तुतोडिषकः-तुतुडिषकः-षिका, तोतुडकः-डिका ;
तोडिता-त्री, तोडयिता-त्री, तुतोडिषिता-तुतुडिषिता-त्री, तोतुडिता-त्री ;
तोडन्-न्ती, [2]व्यतितोडन्, [3]तोडयन्-न्ती, तुतोडिषन्-तुतुडिषन्-न्ती ; —
तोडिष्यन्-न्ती-ती, तोडयिष्यन्-न्ती-ती, तुतोडिषिष्यन्-तुतुडिषिष्यन्-न्ती-ती ;
— तोडयमानः, तोडयिष्यमाणः, — तोतुड्यमानः, तोतुडिष्यमाणः ;
तुट्-तुड्-तुडौ-तुडः ; — — —
[4]तुडितम्-तोडितम्-तः, तोडितः, तुतोडिषितः-तुतुडिषितः, तोतुडितः-तवान् ;
तुडः, तोडः, तुतोडिषुः-तुतुडिषुः, तोतुडः ;
तोडितव्यम्, तोडयितव्यम्, तुतोडिषितव्यम्-तुतुडिषितव्यम्, तोतुडितव्यम् ;
तोडनीयम्, तोडनीयम्, तुतोडिषणीयम्-तुतुडिषणीयम्, तोतुडनीयम् ;
तोड्यम्, तोड्यम्, तुतोडिष्यम्-तुतुडिष्यम्, तोतुड्यम् ;
ईषत्तोडः-दुस्तोडः-सुतोडः ; — —
तुड्यमानः, तोड्यमानः, तुतोडिष्यमाणः-तुतुडिष्यमाणः, तोतुड्यमानः ;
तोडः, तोडः, तुतोडिषः-तुतुडिषः, तोतुडः ;

---

1. 'रलो व्युपधात्—' (1-2-26) इति सेटः क्त्वायाः सनश्च कित्त्वविकल्पः । तेन रूपद्वयम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
2. 'न गतिहिंसार्थेभ्यः' (1-3-15) इति निषेधात् कर्मव्यतीहारेऽपि शानज् न ।
3. 'तोडनम्=द्रावणम्' इति क्षीरस्वामी । एवमेव पाणिनीयधातुपाठ-नामके तञ्जापुरीयसरस्वतीमहाल् विमर्शनालयमुद्रिते कोशेऽपि वर्तते । तदानीं धातोः कम्पनार्थकत्वात्, ण्यन्तात्, 'निगरणचलनार्थेभ्यः—' (1-3-87) इति शत्रैव, न शानजिति ज्ञेयम् । हिंसार्थेषु तु शानज् भवतीति विशेषः ।
4. 'उदुपधाद् भावादिकर्मणोरन्यतरस्याम्' (1-2-21) इति सेटो निष्ठायाः भावकर्म-विषये कित्त्वविकल्पनाद् रूपद्वयम् ।

A. 'अकद्दरिक्रीडनधूततोडकान् प्रहूडितान् होडदरोड्यभिक्षुकैः ।' धा. का. 1.46.